नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

**P—16–2—Sans. II**

# प्रवेशिका परीक्षा, 2010

## संस्कृत — द्वितीय पत्रम्

## ( संस्कृत साहित्य — पद्य-काव्य, कोष व छन्द )

समय : $3\frac{1}{4}$ होरा: ( सपाद होरात्रयम् )

पूर्णांक : 40

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यत: लेख्य: ।

(2) सर्वे प्रश्ना: अनिवार्या: ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वार: ( i, ii, iii एवं iv ) भागा: सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वार: ( **अ, ब, स** एवं **द** ) विकल्पा: सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) ऐश्वर्यस्य विभूषणम् अस्ति

(अ) सुजनता (ब) दुर्जनता

(स) चपलता (द) न किमपि । $\frac{1}{2}$

(ii) रामायणे कति काण्डा: सन्ति ?

(अ) त्रय: (ब) सप्त

(स) पञ्च (द) अष्ट: । $\frac{1}{2}$

(iii) मगणस्य स्वरूपम् अस्ति

(अ) ।ऽऽ (ब) ऽ।।

(स) ऽऽऽ (द) ऽ।ऽ. $\frac{1}{2}$

(iv) प्रत्येकं छन्दसि पादा: भवन्ति

(अ) षट् (ब) त्रय:

(स) पञ्च (द) चत्वार: । $\frac{1}{2}$

2. कुमार्या: द्वे नामनी के ? 1
3. वीरस्य मातु: द्वे नामनी लिखत । 1
4. कस्य पुरत: कालीदेवी साक्षात् आगता ? 1
5. मातु: चत्वारि नामानि कानि ? 1
6. पितु: त्रीणि नामानि लिखत । 1
7. मात्राया: ( छन्द:शास्त्रानुसारं ) किं लक्षणम् ? 1
8. जगति पुण्यकृत: किं लभन्ते ? 1
9. लोकदेवताया: रामदेवस्य मातुर्नाम किम् आसीत् ? 1
10. वामनमते क: अलङ्कार: ? 1
11. ''माताभूमि पुत्रोऽहं पृथिव्या:'' इत्यस्य भावार्थो लेख्य: । 2
12. ''कौलेयक:'' पदस्यार्थो क: ? 1
13. ''अखण्डं भारतं स्मरेत्'' इति पाठस्य सारांश: स्वसंस्कृते लेख्य: । 2
14. ''वीराङ्गना कर्मावती'' पाठानुसारेण डॉ० रामदेव साहू महोदयस्य परिचयो देय: । 2
15. कासु परिस्थितिषु ईश्वर: भूमौ अवतरति ? 2
16. 'स्वस्थवृत्तम्' इति पाठे नित्यं स्नानमाचरणेन के लाभा: ? 2
17. निम्नांकितेषु श्लोकेषु **द्वयो**: सप्रसङ्ग भावार्थो लेख्य: $2 \times (\frac{1}{2} + 1\frac{1}{2}) = 4$

(i) विहाय वैकुण्ठ सुखाभिलाषं लक्ष्मी: विलासं विषमेव मत्वा ।
प्रसूनशय्यां पविवद् विचिन्त्य भक्तार्ति नाशाय तवावतार: ॥

(ii) या राजमाता खलु कर्मदेवी नाम्ना पवित्रीकृत कीर्तिकाया ।
संरक्षिकाऽसीदपि युद्धकर्माधिष्ठातृरूपेण निरुपितात्मा ॥

(iii) स शीतलो गन्धवह: समीर: स तित्तिराणां मधुरो विराव: ।
तन्नर्तनं बर्ह-विभूषणानां समुत्प्लुति: सा च कुरंगमाणाम् ॥

18. अधोलिखितेषु अलङ्कारेषु यथेच्छं **द्वयोः** लक्षणमुदाहरणञ्च लिखत — 2 + 2 = 4

(i) अर्थान्तरन्यासः

(ii) दृष्टान्तः

(iii) विशेषोक्तिः

(iv) परिकरः ।

19. निम्नाङ्कितेषु छन्दःसु कयोश्चित् **द्वयोः** लक्षणोदाहरणानि लेख्यानि — 2 + 2 = 4

(i) मालिनी

(ii) मन्दाक्रान्ता

(iii) शार्दूलविक्रीडितम्

(iv) हरिणी ।

20. निम्नलिखितेषु श्लोकेषु केषाञ्चित् **त्रयाणां** प्रसङ्गान्वयपूर्वकं व्याख्या कार्या —

$3 \times ( \frac{1}{2} + \frac{1}{2} + 1 ) = 6$

(i) यत्र मन्दाकिनी पाप संहारिणी—
यत्र गोदावरी चारुसंचारिणी ।
देववाणी च यत्रास्ति मोदाकुला—
भूतले भाति मेऽनारतं भारतम् ॥

(ii) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

(iii) वयोबल शरीराणि देशकालाशनानि च ।
समीक्ष्य कुर्याद् व्यायामम् अन्यथा रोगमाप्नुयात् ॥

(iv) जायते पुष्करं कर्दमात् सर्वदा
कालकूटोद्भवो हन्त रत्नाकरः ।
चन्दिरश्चन्दिरश्च प्रियो लांछितो—
वर्णये तत्प्रमादं कियत् साम्प्रतम् ॥

(v) न ते मृत्युः प्रभविता यावज्जीवितुमिच्छसि ।
त्वत्तो हि अनुज्ञां सम्प्राप्य मृत्युः प्रभवितानघ ॥